LIBRARY
BANGALORE

SE – 047

**I Semester B.C.A./B.H.M. Examination, January/February 2026**
**(SEP 2024 – 25)**
**LANGUAGE SANSKRIT – I**
**Sanskrit Poetry, Grammar and Comprehension**

Time : 3 Hours | Max. Marks : 80

***Instructions :*** *i) Answer in **Sanskrit/Kannada/English**.*
*ii) Q. No. **I, VI** and **VII** should be answered in **Sanskrit**.*

I. समीचीनम् उत्तरं चित्वा लिखत । **(10×1=10)**

ಸರಿಯಾದ ಉತ್ತರಗಳನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ.

Choose and write the correct answer.

1) 'किरातार्जुनीयम्' काव्यस्य कर्ता कः ?
अ) कालिदासः आ) श्रीहर्षः इ) भारविः ई) बाणभट्टः

2) किरातवेषधारी कः ?
अ) शिवः आ) अर्जुनः इ) दुर्योधनः ई) वनेचरः

3) कुरुणाम् अधिपः कः ?
अ) युधिष्टिरः आ) दुर्योधनः इ) दुश्यासनः ई) भीमः

4) चित्तवृत्तयः कीदृशाः ?
अ) मित्ररूपाः आ) शत्रुरूपाः इ) पुत्ररूपाः ई) विचित्ररूपाः

5) पाञ्चाली का ?
अ) सीता आ) अहल्या इ) द्रौपदी ई) मण्डोदरी

6) हितं मनोहारी च वचः कथं वर्तते ?
अ) सुलभं आ) दुर्लभं इ) कलभं ई) वल्लभं

7) मूढधियः कं व्रजन्ति ?
अ) पराभवं आ) जयं इ) सुखं ई) दुःखम्

P.T.O.

Scanned with OKEN Scanner

8) कः परमापदं पदम् ?

अ) ज्ञानी आ) मूर्खः इ) अविवेकः ई) भीमः

9) प्रशमाभरणं किम् ?

अ) सख्यम् आ) दानं इ) धनं ई) शौर्यम्

10) रेणुरुषितः कः ?

अ) भीमः आ) अर्जुनः इ) नकुलः ई) सहदेवः

II. **एकस्य** प्रश्नस्य प्रबन्धरूपेण उत्तरं लिखत । **(1×10=10)**

ಯಾವುದಾದರೂ **ಒಂದು** ಪ್ರಶ್ನೆಗೆ ಪ್ರಬಂಧ ರೂಪದ ಉತ್ತರವನ್ನು ಬರೆಯಿರಿ.

Write an essay on **any one** of the following question.

1) भारवेः देश–काल–कृतिः अधिकृत्य प्रबन्ध लिखत ।

ಮಹಾಕವಿ ಭಾರವಿಯ ದೇಶ–ಕಾಲ–ಕೃತಿಗಳ ಕುರಿತು ಪ್ರಬಂಧವನ್ನು ಬರೆಯಿರಿ.

Write an essay on place-date-works of Bharavi.

2) द्रौपदी–युधिष्ठिरयोः सम्भाषणं लिखत ।

ದ್ರೌಪದಿ ಮತ್ತು ಯುಧಿಷ್ಠಿರರ ನಡುವಿನ ಸಂಭಾಷಣೆಯನ್ನು ಬರೆಯಿರಿ.

Write the conversation between Droupadi and Yudhishtira.

III. **द्वयोः** विषययोः लघुटिप्पणीं लिखत । **(2×4=8)**

**ಎರಡು** ವಿಷಯಗಳನ್ನು ಕುರಿತು ಲಘು ಟಿಪ್ಪಣಿ ಬರೆಯಿರಿ.

Write short notes on **any two** of the following.

1) महाकाव्यम् ।

2) दुर्योधनः ।

3) द्रौपदी ।

4) वनेचरः ।

RAMAIAH INSTITUTE OF BUSINESS STUDIES
LIBRARY
BANGALORE-54

Scanned with OKEN Scanner

IV. चतुर्णां श्लोकानाम् अनुवादं कृत्वा विवृणुत । (4×4=16)

ನಾಲ್ಕು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದ ಮಾಡಿ ವಿವರಿಸಿ.

Translate and explain **any four** Shlokas of the following.

1) कृतप्रणामस्य मही महीभुजे जिता सपत्नेन निवेदयिष्यत: ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिण: ।।

2) विशङ्कमानो भवत: पराभवं नृपासनस्थोऽपि वनाधिवासिन: ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधन: ।।

3) असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान् न बाध्यतेऽस्य त्रिगुण: परस्परम् ।।

4) प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधिमण्डलं भुव: ।
सचिन्तयत्येव भियस्त्वदेष्यती रही दुरन्ता बलवद्विरोधिता ।।

5) गुणानुरक्तामनुरक्तसाधन: कुलाभिमानी कुलजां नराधिप: ।
परैस्त्वदन्य: क इवापहारयेन्मनोरमामात्मवधूमिवश्रियम् ।।

6) परिणामसुखे गरीयसी व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुण: ।।

V. **त्रयाणां** वाक्यानां सन्दर्भं विवृणुत । (3×4=12)

ಯಾವುದಾದರೂ **ಮೂರು** ವಾಕ್ಯಗಳಿಗೆ ಸಂದರ್ಭವನ್ನು ಬರೆಯಿರಿ.

Annotate **any three** of the following.

1) गुणानुरागेण शिरोभिरुह्यते ।

2) वरं विरोधोऽपि समं महात्मभि: ।

3) वसूपमानस्य वसूनि मेदिनी ।

4) निरस्तनारीसमया दुरा धय: ।

5) सहसा विदधीत न क्रियाम् ।

RAMAIAH INSTITUTE OF BUSINESS LIBRARY BANGALORE-54

Scanned with OKEN Scanner

VI. **संस्कृत**भाषया उत्तरं लिखत ।

अ) **पञ्चानां** पदानां सन्धिं विभज्य लिखत । (5×1=5)

1) विद्यालय: 2) गुरुपदेश: 3) गणेश: 4) ब्रह्मर्षि:

5) एकैकम् 6) गौरीश: 7) सूर्योदय: 8) मन्वन्तरम्

आ) पदपरिचयं कुरुत **(पञ्चानामेव)** । (5×1=5)

1) विजेतुं 2) कृत्वा 3) वर्धमान: 4) नेय:

5) प्रविश्य 6) वक्तुं 7) हरन् 8) त्यक्तवान्

इ) अस्य गद्यभागस्य अनुवादं **कन्नड/आङ्गल**भाषया वा लिखत । (1×4=4)

ಈ ಗದ್ಯಭಾಗವನ್ನು **ಕನ್ನಡ** ಅಥವಾ **ಆಂಗ್ಲ**ಭಾಷೆಗೆ ಅನುವಾದಿಸಿ.

Translate the following passage into **Kannada** or **English**.

कस्मिंश्चित् ग्रामे कश्चन वृद्ध: कृषिक: अवसत् । स: परिश्रमी दूरदर्शी सरलस्वभाव: च आसीत् । तस्य चत्वार: पुत्रा: आसन् । परं ते अलसा: अभवन् । ते कृषिकार्ये पितु: सहयोगं न अकुर्वन् । न च तेषां कृषिकार्ये रुचि: आसीत् ।

VII. इमं परिच्छेदं पठित्वा प्रश्ननाम् उत्तराणि लिखत । (5×2=10)

हनुमान् 'केसरी' इति कपे: पुत्र: । तस्य माता अञ्जनादेवी । हनुमत: अपरं नाम मनोजव: इति । एष: श्रीरामस्य परमभक्त: आसीत् । भक्त जनान् उद्धर्तुम् आगत: देव: इति तस्य भक्ता: भावयन्ति । स: सूर्यदेवात् सकलविद्या: प्राप्तवान् । आञ्जनेय: भीमस्य सत्वपरीक्षां कृतवान् । भीमस्य प्रार्थनां पुरस्कृत्य स: स्वीयं सागरलङ्घनरूपं दर्शितवान् ।

**प्रश्ना:**

1) हनुमान् कस्य पुत्र: ?

2) हनुमत: अपरं नाम किम् ?

3) हनुमान् कस्य परमभक्त: आसीत् ?

4) आञ्जनेय: कस्मात् सकलविद्या: प्राप्तवान् ?

5) भीमस्य सत्वपरीक्षां क: कृतवान् ?

RAMAIAH INSTITUTE OF BUSINESS STUDIES LIBRARY BANGALORE-54

Scanned with OKEN Scanner